**आजात** *a.* Of high birth, noble birth; यो वै कश्चिदिहाजातः क्षत्रियः क्षत्रकर्मवित् Mb. 5. 134. 38.

**आजातिः** *f.* Birth, origin; एकविंशतिमाजातीः पापयोनिषु जायते Ms. 4. 166.

**आजानः** [ आ-जन्-घञ् ] 1 Birth, origin.-2 Generating cause (said to be *n.* also in these two senses). **-नम्** 1 Birth-place. -2 Birth, descent, species (Ved.). *-ind.* From the time of the creation. **-Comp.** **-ज** *a.* born since the creation (as gods &c). **-देवः** a god from the very creation; ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दः Bri. Up. 4. 3. 33.

**आजानिः** *f.* 1 One giving birth, parent, especially a mother (Sāy.). -2 Birth, descent; आजानीरुषसस्ते अग्ने Rv. 3. 17. 3.

**आजानेय** *a.* (**-यी** *f.*) 1 Of good breed (as a horse); आजानेयो दन्तिनस्त्रस्यति स्म Śi. 18. 23. -2 Of noble birth, fearless, undaunted. **-यः** A well-bred horse; शक्तिभिभिन्नहृदयाः स्खलन्तोऽपि पदे पदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः ॥ Śabdak.

**आजानेय्य** *a.* Ved. Of good breed.

**आजपादम्** The lunar mansion पूर्वाभाद्रपदा.

**आजमीढ** *a.* Belonging to or produced in the country of अजमीढ (or अजमीर); a descendant of अजमीढ; Rv. 4. 44. 6. **-ढाः** (pl.) The kings of that country. Addressed to युधिष्ठिर; Bhāg. 1. 15. 13.

**आजवनम्** Rushing upon, fighting, attacking.

**आजानु** *ind.* Up to the knees; °विलम्बिबाहुम् R. 18. 26, 16. 84.

**आजिः** *m. f.* [ अजन्त्यस्यां, अज्-इण् P. III. 3. 108 Vārt. इणजादिभ्यः ] 1 A battle, fight, combat; ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः R. 12. 45. -2 A fighting or running match; आजिं धाव् or इ, -अज् or सृ to run with or against any one for prize. -3 Battle-field, place for running; racecourse, level ground; दीर्घं यदाजिमभ्यख्यदर्यः Rv. 4. 24. 8. शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच Ve. 3. 11. -4 Limit, boundary; यथाग्रेर्मन्थनमाजेः सरणम् Bri. Up. 1. 3. 5. -5 A road, way (*m.*). -6 An instant (*m.*). -7 Abuse, invective. **-Comp.** **-अन्तः** the goal in a race-course. **-कृत्** *a.* Ved. 1 running for a prize; यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप Rv. 8. 45. 7. -2 making a war. **-क्रिया** fighting. **-तुर्** *a.* Ved. victorious in battles; आजितुरं सत्पतिं विश्वचर्षणिम् Rv. 8. 53. 6. **-मुखम्** The front line in a battle; Ratn.

**आजि** 1 P. To conquer, win, acquire; उभा क्षयावाजयन् याति Rv. 2. 27. 15.

**आजयनम्** 1 Conquering. -2 A battle.

**आजिगीषु** *a.* Ambitious, wishing to excel or surpass.

**आजिग्रह** *a.* One who takes or seizes.

**आजिज्ञासेन्य** *a.* Liable to be investigated. **-न्याः** (pl.) N. of a short section of the Kuntāpa hymns in the Aitareya Brāhmaṇa.

**आजिरि** *a.* [ अजिर-इञ् ] Situated in the court-yard.

**आजिरेय** *a.* Belonging to or produced in a court-yard.

**आजीव्** 1 P. To live by or maintain oneself with; to have the use or enjoyment of; to subsist; आजीवन्स्वेच्छया दण्ड्यो Y. 2. 67.

**आजीवः, -वनम्** 1 Livelihood, subsistence, maintenance, भवत्याजीवनं तस्मात् Pt. 1. 48; cf. words like रूपाजीव, अजाजीव, शस्त्राजीव, स्त्र्याजीव &c.; आजीवनार्थः Ms. 10. 79, 11. 63 means of livelihood; बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे Rām. 2. 56. 14. -2 Profession, the means of maintaining oneself; विशुद्ध इदानीमाजीवः Ś. 6. **-वः** A Jaina beggar.

**आजीवकः** 1 A beggar, one who earns his livelihood everywhere. -2 See आजीविकः below.

**आजीविकः** A religious mendicant of the sect founded by Gosāla Maṅkhaliputra, following special rules with regard to livelihood.

**आजीविका** Profession, means of subsistence.

**आजीवितान्तम्** *ind.* For life.

**आजीविन्** *a.* 1 Having a livelihood. -2 A particular kind of beggar (एकदण्डिन्).

**आजीव्य** *pot. p.* 1 To be practised (as a profession). -2 Fit for or affording a livelihood; आजीव्यांश्चिच्छिदुर्वृक्षान् Bhāg. 7. 2. 15. -3 Habitable, fertile; रम्यं पशव्यमाजीव्यम् Y. 1. 321; Ms. 7. 69. **-व्यम्** A means of subsistence.

**आजुर्** *f.*, **-आजू** *f.* 1 Working without wages. -2 A servant working without wages. -3 Doomed residence in a hell.

**आज्ञा** 9 P. To know, understand, learn, obtain information, ascertain, notice, perceive. *-Caus.* (ज्ञापयति) 1 To order, command, direct. -2 To assure.

**आज्ञप्त** *a.* Ordered, commanded; भौमाश्चैवान्तरिक्षाश्च कालाज्ञप्ता भयावहाः Rām. 7. 6. 53.

**आज्ञप्तिः** *f.* An order, injunction, command; °हर *a.* bearing a message, messenger; Ś. 2.

**आज्ञा** [ आ-ज्ञा-अङ् ] P. आतश्चोपसर्गे P. III. 3. 106. 1 An order, command; तथेति शेषामिव भर्तुराज्ञाम् Ku. 3. 22. -2 Permission, allowance. -3 Power of arrangement; नैवार्थेन च कामेन विक्रमेण न चाज्ञया । शक्या दैवगतिर्लोके निवर्तयितुमुद्यता ॥ Rām. 6. 110. 25. **-Comp.** **-अनुग, -अनुगामिन्, -अनुयायिन्, -अनुवर्तिन्, -अनुसारिन्, -संपादक, -वह** *a.* obedient, submissive. **-कर, -कारिन्** *a.* obeying or executing orders, obedient.